श्री सत्यध्यानमुनीशविजयचम्पूः

द्विजवर्याः ज्ञानिधुर्याः आचार्यवर्या जयाचार्याः बाल्य एव वृषपर्वपरिवारजना इव सातिशयकृतकाव्योपासनाः, जनकान्वयजा इव रघुवंशकृतादराः, पाण्डवा इव शिशुपालवधावलोकननिर्वृताः, वन्ध्या-मनोरथा इव कुमारसंभवार्थकल्पनानन्दनिर्भराः, कर्षकाः इव मेघदूत-रसवृष्टिसमासादनोत्सुकाः, सुरापानविरोधिनोऽपि कादम्बरीरसपान-लालसाः, विरक्ता अपि नानारसास्वादनकुतुकिनः, ब्रह्मसूत्रैकधारिणोऽपि विविधालंकारग्रहणाग्रहिणः, कृष्णप्रेमप्रवाहा इव अपार्थ-भावाक्षमाः, श्रवणचक्षुर्व्यापारा इव ध्वन्यालोकपरिग्रहणपर्याप्त पाटवोपपन्नाः,अवलोकन-सातत्याध्ययन-नैयत्य-समधिगत-काव्यनाटक-चम्पू प्रबन्धादि साहित्य-पाण्डित्य-सौहित्य-साहित्या ह्यासन्।

तेषां च आचार्याणां रूपानुरूपा गुणानुगुणा शीलानुकूला सत्कार्यानुकार्या दिनचर्यायितपतिपरिचर्या निरन्तरानुष्ठित-देव-ब्राम्हण तुलसी-गौरी-सपर्या सर्वसद्गुणोपकार्या शास्त्राधीतिपालनैकोपकार्या आर्या सतीकुलधुर्या कृष्णानाम्नी बभूव भार्या।

आर्या चैवान्नपूर्णा च शङ्करौ सर्वमंगला
वृषानुकूला चोमेव शिवमेवेच्छंती सती ।।
जनकान्वयरत्नं सद्रामान्तःकरणप्रिया।
चंचत्कुरंगलोलाक्षी सा सीतेवाबभौ सती ।।

वीणामाधुर्ययुग्वाणी ब्रह्माराधनतत्परा।
भारती-कुशला सासीत् साक्षादिव सरस्वती।
अनसूयानुसूयेव सतीव च सती सती
लक्ष्मीरिव लसल्लक्ष्मीर्विनता विनतेव सा

Scanned by CamScanner

सुनीतिरिव सन्नीति-ध्रुवापत्योपशोभिता
सुरुच्युत्तम-सुक्षेम-कांक्षिणी मानिनी बभौ
परिचचार गुरुन् तुलसीं गवीमपि ननाम च नाम हरेः सदा
बहु जजाप पुपूज रमां सदा गतमदा प्रमदा प्रमदान्विता ॥

पतिपदाब्ज मरन्दमधुव्रता
पतितपावन पुण्यपतिव्रता ॥
बहुलकृच्छ्रदकृच्छ्रमुखान् व्रता-
नविकलान् सकलान् कलयन्त्यहो ॥

पतिगमच्युतमच्युतभक्तितः
खलु समर्चति कुङ्कुमर्चचिता
अपि च तर्पयति स्म हि सार्थकी-
कृततिथीनतिथीन् रसभोजनैः ।

तयोश्च चित्राचन्द्रमसोरिव जान्हवीजलनिध्योरिव पार्वती परमेश्वरयोरिव परस्परं रूपानुरूपयोः गुणानुगुणयोः सुरूपयोरप्यरूपयोः सरसयोरप्यरसयोः समानयोरप्यसमानयोः सद्वितीययोरप्यद्वितीययोः कृष्णा-जयार्ययोर्दम्पत्योः पंचकृत्वः कृतविष्णुपंचक-भीष्मपंचकादि व्रतानुष्ठान प्रभावादिव रूपानन्या धामधन्याः शीलमान्याः जन्मजात सौजन्याः संजज्ञिरे पंचकन्याः ।

हरिभक्तिः पितृश्रद्धा - धर्मधीः शीलसौहृदे ।
इति पञ्चगुणैः पञ्च कन्या बन्धुप्रियंकराः ॥
पञ्चकन्याश्च ताः पञ्चबाण पञ्चायुधोपमाः
पाञ्चालिकाश्चञ्चलोत्था इवाचञ्चन् स्वके गृहे ॥

सौन्दर्यं तच्छरीरस्थं माधुर्यं वाचि संस्थितम्
वैधुर्यं दुर्गुणानां च प्राचुर्यं सद्गुणावलेः ॥
शील-स्वभाव-सद्धीनां प्रामुख्यं तासु चाभवत् ।
गुणास्तासां नैव गुणाः प्रधाना एव तासु ते ॥

Scanned by CamScanner

श्री सत्यध्यानमुनीशविजयचम्पूः

अत्रान्तरे तु तत्रायातस्त्रासौ पुत्रगृध्नुकौ ॥
कश्चिज्ज्योतिष्युपाध्यायस्तौ विपश्चिदमश्चिम ॥

सुत्रामेव पवित्रपाणिः, सवितेव द्वादशनाम भासुरः, उडुपि कृष्ण इव गोपीचन्दनाभिव्यक्तकान्तिकान्तकलेवरः, वसिष्ठ इव अक्षमालोपशोभितः, रविरथ इव त्रिलोकसंचरणक्षमाक्षः, वनप्रदेश इव धात्रीमालालंकृतः, दामोदर इव कृततुलसीपाणिग्रहणः, वैष्णवविद्वानिव कण्ठस्थीकृतब्रह्मसूत्रः, पावक इव बहुलशिखाकलापोज्जलः, वनस्पति प्रपंच इव ज्योतिर्वर्षोपजीवितः, निस्प्रहिब्राह्मण इव न क्षत्रोपजीवी, अगस्त्य इव सामुद्रिक–सारस्वत–पारदृश्वा, कमलाकर इव सूर्यादि-कर-दर्शनोत्सुकः, संपन्न–कृषीवल इव बहुधान्यराशिनिरीक्षणोद्यतः, धूर्जटिरिव पाण्डुरोमाश्लिष्टोरस्कः, गलितकैश्यतया वृथा मुंण्डित शिरस्कः, आसन्न-सप्तति-वयस्कः, चतुराननोच्चरिताम्नायतया वाणीवाल्लभ्यतया च रजोमूर्तिरित्युपमितोऽपि नीरजस्कः, व्रतोपवासापादितकृशिम्ना शुष्कवपुष्कः कश्चन ज्योतिष्क–विद्या–परिष्कृत–मस्तिष्कः ज्योतिमार्तण्डः ॥

ज्यौतिष्य–विद्याप्तादूष्य–वैदुष्य–वैशेष्य-मण्डितः स पण्डितः पुंसन्तान-वैकल्य-जनित-दुःख-पौष्कल्यापत्त्योः दूरीभूतसन्तोष समाधान संपत्त्योः तयोः दम्पत्त्योः अन्ववीवचत् ललाट-लेख-रेखोपरेखाः अवालूलुकत् हस्त–सामुद्रिक–लक्षणानि, पर्यैक्षिष्ट च उभयोरपि जातके ।

तदालोक्य आश्चर्यचर्यापर्यावृतेन मनसा, विस्फारितेन चक्षुषा, कौतुकविस्फोरितेन हृदयेन, पुलकजालककोरकितेन कलेवरेण च अमंदानन्द-स्पन्दमान-वदनारविन्दः अभाणीत् क्षोणीभूसुरः एणांकमुखीं

Scanned by CamScanner

एणीदृशं कृष्णाम्बां तथा जरसा विनापि चिन्ताजूत्या तरसा जरयेव जीर्णं दुःखपूर्णं विषादविवर्णं सर्ववर्णीयैरपि वर्ण्यमानं उत्तप्त-सुवर्ण-सवर्णारुणवर्णं जयाचार्यंप्रति अम्बु-संभृत-श्रावणाम्भोदकदम्बरवविडम्वि कम्बु-कण्ठोत्थित-गम्भीर-ध्वनिना ।

" किं तान्ति-क्लान्ति-सन्ताप-सन्तते जननीं सदा
चिन्तां संतनुषे स्वांते संतानाभावकारणात् "

चिन्ताग्निना त्वनुस्वारो दह्यते बिन्दुमातृकः ।
चितैव रचिता चित्ते स्यात्तत् चिन्तां न सन्तनु ।।
चिन्तां संत्यज संतोषं स्वान्ते भज निरन्तरम्
स्वःसन्तानो हि संतानरूपेणैवोदितो भवेत्

भवतोर्भवतो मुक्तिर्भवितोद्भवतः सुतात्
जनकस्य जनानां च सद्गतेर्जनकः स हि ।
त्वद्वंश-मुक्ताऽरोहेत्श्रीगज-कुम्भोपरि-स्थितिम् ।।
तद्दिग्जय यशोमुक्ता स्याद्दिक्कुंजरकुम्भगा ।।

कृष्णाम्बोदरदुग्धाब्धे रुदीयात्सुत चन्द्रमाः
सर्वज्ञलालितोऽनंको द्विजराजः सुधाकरः ।।
स मरुताऽमरतोच्चपदस्थितेः समहितं महितं सुहितं नृणाम्
प्रथयते मतमागमसंमितं मतिमतां च सतामपि संमतम् ।।

पाखण्डादि कुवादिमण्डलमथो चण्डप्रचण्डो धिया
पुत्रस्ते खलु खण्डयिष्यति पुन र्भूखण्ड एवाऽखिले ।।
वेदोक्तं परिमण्डयिष्यति मतं चाखण्डलांशैर्जया-
यैर्व्याख्यातसुधां तथेतरकृतीः प्रख्यापयिष्यत्यपि ।।

Scanned by CamScanner

सौजन्यं सहजन्यं हि विनयोऽनुनयस्तथा
नयो नाभिनयस्तासां स्वभावो जन्मनाभवः ॥
मृदिमा हृदि तासां च काय कोमलिमा तथा
वाण्यां मधुरिमा गात्रे सुषुमाऽनुपमाह्यभूत्

श्रिया धिया द्युस्त्रियो नु भूषिता इव भूषिताः (भू+उ)
स्वर्गादप्सरसां वर्गात् निर्गत्यात्रैत्य रेजिरे ॥
जयार्यजाया सुमनाः स्वभावात् दुहितृ पंचप्रसवात् परं सा
मनाक् च खिन्ना विमनायमाना कृष्णा सतृष्णा पुमपत्यलब्ध्यै ॥

जात्या विरक्तो हरिपादसक्तो भक्तो जयार्यो न भवानुरक्तः ॥
तत्रास नो पुत्रजनेरभावात् तत्राऽस पूजाजपपाठसुस्थः ॥
पुराण–पाठ–प्रवचोऽजपूजा–पारायणादीति 'प' वर्गसेवा ।
नूनं भवित्री ह्यपवर्गदात्रीत्येवं सिषेवे हरिमेव विद्वान् ॥

कृष्णा विधेर्वक्रिमविक्रमेणाक्रान्ता च तान्ताऽस जयार्यकान्ता ।
स्वान्ते च चिन्ताशतदूयमाना भ्रान्ता दुरन्ताधिहतात्यशान्ता ॥
एकान्त आगत्य च विप्रकान्ता कान्तं स्वमेकान्तरमेशभक्तम्
स्विन्नालिकान्ता लुलितालिकान्ता शान्तं च दान्तं गुणवन्तमूचे ॥

कन्याः स्वनाम धन्या नो मान्याः स्वानन्यसद्गुणैः
किंत्वेकमात्रपुत्रोऽपि जातो नात्रेति खिद्यते ॥
आवयोर्मिथुनं कन्याराशिरेवागतस्त्विति
स्वान्तं कृन्तति चिन्ताख्यो न ममाऽस्ति तुलाऽपदाम् ॥

विवाहानन्तरं कन्या यान्ति स्व–श्वशुरालयम्
यातासु पंचपुत्रीषु प्रपंचः शून्य एव नः ॥
भ्रातृहीनाश्च कन्या नौ नोद्वक्ष्यन्ति वरा वराः ॥
प्रौढाः कन्या यद्यनूढाः सोढव्यं घनसंकटम् ॥

Scanned by CamScanner

पुमर्थप्राप्तये पुंसां पुमपत्यं ह्यवश्यकम्
चतुर्थं पुरुषार्थं तु न कन्या प्रापयेद् ध्रुवम् ॥
एकमात्रोऽपि सत्पुत्रो गोत्रमात्रं समुद्धरेत्
सुत्रामेव हि सुस्वस्थो विबुधान् पालयेदपि ॥

अपत्यभावतृप्तासं विवाहानंतरं ह्यहम् ।
अपत्याभावतो दुःखं संप्रपत्स्यामि सांप्रतम् ॥
पुत्रस्योद्भवने नृणां भवनं भुवनाधिकम्
भवेत्पुष्पवनं पुत्राभावे पितृवनं भवेत् ॥

नन्दनः स्पर्शमात्रेणानन्दनश्चन्दनोपमः ।
अभावे दुःखदावाग्नेरिन्धनं जीवनं भवेत् ॥
सांक्रन्दनं नंदनं स्यान्नन्दनैर्मर्त्यजीवनम्
विना तु नन्दनं नूनं 'संक्रन्दनमयं' वनम् ॥

पुत्रसूत्या वंचिताहमतिमात्रमपत्रपे
जनानां पुरतस्थातुं न मात्राऽस्ति मच्छुचाम् ॥
किं तया कान्तया कान्त हन्त पुंसन्ततिं च या
न संतनोति सा वंशच्छिन्निकृन्तनिका मता ॥

वंद्यैकपुत्रसूःकिन्तु वन्ध्या नैकसुताऽप्रसूः
अश्रुणाऽनुस्वारलोपाद् वध्या स्याद् वस्तुतो भुवि ॥
दम्पत्योर्नन्दनो न स्यान्नन्दो न स्यात् क्वचिद् भवे ।
दुःखसन्ताननाशः पुंसन्तानेनैव संभवेत् ॥

अनया पापया भावी न भवत्सुतसंभवः
अन्यां कामप्युद्वहन्तु स्यात्सुतो नः कुलोद्वहः ॥
सपत्नीमपि वः पत्नीमन्तर्वत्नी भवेदिति ।
पुत्ररत्नं च सूयेतेत्येवं यत्नेन पालयें ।

Scanned by CamScanner

तदगण्येन पुण्येन भवद्वंशाम्बुधौ द्रुतम्
पुत्रमण्युद्भवः स्यात्तद् विवाहोऽन्यो विधीयताम् ।

एवं सन्तानदारिद्र्येण समुद्विग्ना, दुःखसागर निमग्ना, शोकभार-भुग्ना, दुरन्तचिन्तोद्विग्ना, सुभद्रेव हृदयस्थापितधनंजया, पांचालीव भीम सन्तापदुःखिता, रतिरिव अंगजाभावकर्शिता, गंगादेवीव भीष्मचिन्तानुविद्धा, किंकर्तव्यतामौढ्यमभिपन्ना, नितरां खिन्ना, सुतरां विषण्णा, चातितरामवसन्ना, शतधेव हृदि भिन्ना, अंकुशेनेव तुन्ना, सुखाशातन्तोरेव विच्छिन्ना दीनदीना, दूनदूना, समाधानहीना, पुत्र-सन्तानाभाव-चिन्ता-सन्ताप-नितान्त-तान्त-स्वान्ता जयार्यकान्ता करिणीव सद्वंशांकुरापेक्षिणी श्रीकृष्णाम्बिका स्वार्थबलिदानेनापि पतिकुलाभ्युदयमभिकांक्षमाणा अन्य–कन्या–पाणिग्रहार्थमत्यर्थमाजग्राह पतिदेवम् ।

एवं इन्दीवर-सुन्दर-नयन-द्वन्द्व-निष्यन्दमानामन्द-बाष्प-सन्दोहेन पत्युःपादारविन्दं प्रक्षालयन्ती, मन्दीकृत–मन्दाक्षा सधैर्यस्थैर्यं ज्ञानिधुर्यं स्वपतिवर्यं अन्यकन्या विवाहार्थं पौनःपुन्येन प्रार्थयामास जन्म-सहजन्येन सौजन्येन ।

परं जयाचार्यः विवेकिवर्यः अश्रुक्लिन्नं स्वेदस्विन्नं चिन्ताखिन्नं कृष्णाम्बिकामुखमण्डलं दृष्ट्वा विद्रुतान्तःकरणः करुणावरणः हरि-भक्त्याभरणः प्रेम्णा प्रेयस्याः शिर आमृश्य स्रवदश्रुधारां अंगुलीभिःतन्मुखनलिनात् परिमृज्य मन्दमुवाच ।

कृष्णे कृष्णप्रसादं त्वं विद्धि पंचापि कन्यकाः
पंचधा प्रावहद्देव–दामोदर–दया–धुनी ॥
पांचाल्यां पाण्डवाः पंच संभूय प्रेम चक्रिरे
यावत्तावच्चैक एव कृष्णेऽहं त्वय्यकारिषम् ॥

Scanned by CamScanner

ज्ञात्वापि त्वं तु मूर्खेव विवाहान्तरमीहसे
एकपत्नीव्रतस्थोऽहं यावज्जीवं हि रामवत् ।।
एकभार्याऽद्वितीया त्वं द्वितीयां सहसे कथम् ।
भक्तौ ज्ञाने चाद्वितीयः द्वितीयां न वृणे ह्यहम् ।।

अग्रिमेण विवाहेन सुखिनामग्रिमोऽभवम्
द्वितीयोपयमो मां तु नयेदुपयमं ध्रुवम् ।।
प्रथमो मद्विवाहो यद् वि-वाहानुग्रहादभूत्
कन्याविवाहनिर्वाहं लक्ष्म्युद्वाही करिष्यति ।।

वन्ध्या यद्यभविष्यस्त्वं वन्ध्यैव हि कुले मम
पंचकन्या प्रसूत्यन्ते चाभिनन्द्या कुलेऽसि नः ।।
पुत्रोऽपि देवकी–पुत्र–दययाऽत्र भवेच्च नौ ।
प्रीतिपात्रं कलत्रं मे त्वं त्रासं नाप्तुमर्हसि ॥

पितामहेन यः पुत्री कलत्री च कुकन्यया
स्तम्भेन मातृवान् यश्चाप्यावामाराधयाव तम् ।।

शरणं व्रजाव चरणं व्रजेशितुः
हरणं शुचां तदरुणं रुचा स्वया ।।
करुणारसेन वरुणालयः स नौ
तरणीभवेच्च तरणे शुगम्बुधेः ।।